# From Our Library. Lesson 37 C. " Become A Mouse Again! "

| Nouns/ Pronouns | Verbs | Avyayas | Adjectives |
|---|---|---|---|
| तपोवन forest N | आक्रुश्( आक्रोश्) 1. P.P. to cry out. | दीनम् pitiably | |
| मूषक rat M | उप + गम् (उपगच्छ्) 1. P.P. to go near | | |
| वायस crow M | अभि + धाव् 1. P. P. to attack | | |
| मार्जार cat M | शप् 1 U. P. to curse | | |
| कुक्कुर dog M | अव + गम्( अवगच्छ्) 1 P. P. to understand | | |
| आत्मन् oneself | उप + आ+ गम् ( उपागच्छ्) 1. P. P. to come near | | |

पुनः त्वं मूषकः भव ।

एकस्मिन् ( in one ) तपोवने कः अपि मुनिः वसति स्म । एकदा सः स्नानार्थं नदीं गच्छति । तदा कस्यचित् ( of some )काकस्य मुखे सः मूषकं पश्यति । सः मूषकः दीनम् आक्रोशति स्म " रक्ष माम्
इति ।" तदा सः ऋषिः वायसं प्रति पाषाणं क्षिपति। काकस्य मुखात् मूषकः पतति । मुनिः मूषकम् आश्रमम् आनयति पालयति च । कदाचित् भयाकुलः मूषकः मुनिम् उपगच्छति ।मुनिः पृच्छति, " वद, कस्मात् तव भयम् ?" इति । "मार्जारात्" इति मूषकः कथयति । मुनिः वदति, "गच्छ, त्वम् अपि मार्जारः भव, सुखेन क्रीड, चिरं जीव च " इति । तदा निर्भयः सः मार्जारः सुखेन विहरति ।
अथ अनन्तरम्, एकः कुक्कुरः तं मार्जारम् अभिधावति । तदा सः मार्जारः पुनः मुनिम् उपगच्छति वदति च
" अधुना कुक्कुरः मम भयकारणम् " इति । मुनिः वदति " गच्छ, त्वम् एव कुक्कुरः भव , परिरक्ष च आत्मानम् " इति । ततः कः अपि व्याघ्रः तं कुक्कुरम् अभिधावति । सः व्याघ्रभयेन

मुनिं शरणं गच्छति पृच्छति च " वदतु कथं रक्षाणि आत्मानम् इति । मुनेः आशीर्वादेन सः व्याघ्रं भवति | तेन आनन्दितः सः व्याघ्रः सर्वत्र विहरति ।

अथ जनाः तं पश्यन्ति वदन्ति च " पश्यत भोः एतं व्याघ्रं, पूर्वम् एषः मूषकः एव " इति । ततः क्रुद्धः सः व्याघ्रः जनान् प्रति धावति वदति च " व्याघ्रः एवाहम् " इति । जनाः वदन्ति –– " यदि त्वं व्याघ्रः तर्हि भक्षय एतं मुनिम्। पश्याम तव अपि सामर्थ्यम् " इति । व्याघ्रः " तथा " इति वदति मुनिम् अभिधावति च । मुनिः तपोबलेन मूषकस्य हेतुम् अवगच्छति । क्रुद्धः सः " पुनः त्वं मूषकः भव " इति शपति । तदा एव सः मूषकः भवति, अनुभवति च अविवेकस्य फलम् ।

***